યા કુન્દેન્દુતુષારહારધવલા યા શુભ્રવસ્ત્રાવૃતા
યા વીણાવરદણ્ડમણ્ડિતકરા યા શ્વેતપદ્માસના ।
યા બ્રહ્માચ્યુતશંકરપ્રભૃતિભિર્દેવૈઃ સદા પૂજિતા
સા માં પાતુ સરસ્વતિ ભગવતી નિઃશેષજાડ્યાપહા ॥૧॥
દોર્ભિર્યુક્તા ચતુર્ભિઃ સ્ફટિકમણિનિભૈરક્ષમાલાન્દધાના
હસ્તેનૈકેન પદ્મં સિતમપિ ચ શુકં પુસ્તકં ચાપેરણ ।
ભાસા કુન્દેન્દુશઙ્ખસ્ફટિકમણિનિભા ભાસમાનાઽસમાના
સા મે વાગ્દેવતેયં નિવસતુ વદને સર્વદા સુપ્રસન્ના ॥૨॥
સુરાસુરસેવિતપાદપઙ્કજા
કરે વિરાજત્કમનીયપુસ્તકા ।
વિરિઞ્ચિપત્ની કમલાસનસ્થિતા
સરસ્વતી નૃત્યતુ વાચિ મે સદા ॥૩॥
સરસ્વતી સરસિજકેસરપ્રભા
તપસ્વિની સિતકમલાસનપ્રિયા ।
ઘનસ્તની કમલવિલોલલોચના
મનસ્વિની ભવતુ વરપ્રસાદિની ॥૪॥
સરસ્વતિ નમસ્તુભ્યં વરદે કામરૂપિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥૫॥
સરસ્વતિ નમસ્તુભ્યં સર્વદેવિ નમો નમઃ ।
શાન્તરૂપે શશિધરે સર્વયોગે નમો નમઃ ॥૬॥
નિત્યાનન્દે નિરાધારે નિષ્કલાયૈ નમો નમઃ ।
વિદ્યાધરે વિશાલાક્ષિ શૂદ્ધજ્ઞાને નમો નમઃ ॥૭॥
મુક્તાલઙ્કૃતસર્વાઙ્ગ્યૈ મૂલાધારે નમો નમઃ ।

મૂલમન્ત્રસ્વરૂપાયૈ મૂલશક્ત્યૈ નમો નમઃ ॥૯॥
મનો મણિમહાયોગે વાગીશ્વરિ નમો નમઃ ।
વાગ્ભ્યૈ વરદહસ્તાયૈ વરદાયૈ નમો નમઃ ॥૧૦॥
વેદાયૈ વેદરૂપાયૈ વેદાન્તાયૈ નમો નમઃ ।
ગુણદોષવિવર્જિન્યૈ ગુણદીપ્ત્યૈ નમો નમઃ ॥૧૧॥
સર્વજ્ઞાને સદાનન્દે સર્વરૂપે નમો નમઃ ।
સમ્પન્નાયૈ કુમાર્યૈ ચ સર્વજ્ઞે નમો નમઃ ॥૧૨॥
યોગાનાર્ય ઉમાદેવ્યૈ યોગાનન્દે નમો નમઃ ।
દિવ્યજ્ઞાન ત્રિનેત્રાયૈ દિવ્યમૂર્ત્યૈ નમો નમઃ ॥૧૩॥
અર્ધચન્દ્રજટાધારિ ચન્દ્રબિમ્બે નમો નમઃ ।
ચન્દ્રાદિત્યજટાધારિ ચન્દ્રબિમ્બે નમો નમઃ ॥૧૪॥
અણુરૂપે મહારૂપે વિશ્વરૂપે નમો નમઃ ।
અણિમાદ્યષ્ટસિદ્ધ્યાયૈ આનન્દાયૈ નમો નમઃ ॥૧૫॥
પદ્મદા પદ્મવંશા ચ પદ્મરૂપે નમો નમઃ ।
પરમેષ્ઠ્યૈ પરામૂર્ત્યૈ નમસ્તે પાપનાશિનિ ॥૧૭॥
મહાદેવ્યૈ મહાકાલ્યૈ મહાલક્ષ્મ્યૈ નમો નમઃ ।
બ્રહ્મવિષ્ણુશિવાયૈ ચ બ્રહ્મનાર્યૈ નમો નમઃ ॥૧૮॥
કમલાકરપુષ્પા ચ કામરૂપે નમો નમઃ ।
કપાલિ કર્મદીપ્તાયૈ કર્મદાયૈ નમો નમઃ ॥૧૯॥
સાયં પ્રાતઃ પઠેન્નિત્યં ષણ્માસાત સિદ્ધિરુચ્યતે ।
ચોરવ્યાઘ્રભયં નાસ્તિ પઠતાં શૃણ્વતામપિ ॥૨૦॥
ઈત્થં સરસ્વતીસ્તોત્રમ અગસ્ત્યમુનિવાચકમ ।
સર્વસિદ્ધિકરં નૃણાં સર્વપાપપ્રણાશણમ ॥૨૧॥

ઈતિ શ્રી અગસ્ત્યમુનિપ્રોક્તં સરસ્વતીસ્તોત્રં સમ્પૂર્ણમ ॥